NS – 100

10

# I Semester B.Com. Examination, Nov./Dec. 2016
## (Freshers + Repeaters) (CBCS)
## (2014 – 15 and Onwards)
## LANGUAGE SANSKRIT – I
## Yakshaprasna Sangraha, Grammar and Comprehension

Time : 3 Hours Max. Marks : 70

***Instructions :*** *1) Answer in* ***Sanskrit / Kannada / English.***
*2) Answer Question* ***I, V*** *and* ***VI*** *in* ***Sanskrit*** *only.*

I. समीचीनं उत्तरं चिनुत : **(10×1=10)**
ಸರಿಯಾದ ಉತ್ತರವನ್ನು ಆರಿಸಿ ಬರೆಯಿರಿ :
Select the correct answer :

1) महाभारतस्य कर्ता क: ?
अ) वाल्मीकि: आ) कालिदास: इ) माघ: ई) वेदव्यास:

2) महाभारते कति पर्वा: सन्ति ?
अ) एकादश आ) द्वादश इ) अष्टादश ई) दश

3) हतान् भ्रातृन् दृष्ट्वा क: विललाप ?
अ) भीम: आ) नकुल: इ) अर्जुन: ई) युधिष्ठिर:

4) यक्षाऽहमस्मि इति क: वदति ?
अ) यमधर्मराज: आ) इन्द्र: इ) गन्धर्व: ई) भूत:

5) केन बुद्धिमान् भवति ?
अ) वृद्धसेवया आ) देवसेवया इ) भूतसेवया ई) प्राणिसेवया

6) आतुरस्य किं मित्रम् ?
अ) पिता आ) भिषक् इ) औषधं ई) मधु:

7) भृत्येषु दानं किमर्थम् ?
अ) धर्मार्थम् आ) भरणार्थम् इ) यशोऽर्थम् ई) भयार्थम्

8) किं हित्वा अर्थवान् भवति ?
अ) कामं आ) क्रोधं इ) मोहं ई) लोभं

ST. CLARET COLLEGE LIBRARY

9) धैर्यं किम् इति ऋषिभिरूक्तं ?

अ) मनोनिग्रहः आ) भृत्यनिग्रहः इ ) इन्द्रियनिग्रहः ई) शत्रुनिग्रहः

10) भीमस्य अपरं नाम किं ?

अ) वृकोदरः आ) मारुतिः इ ) बलवान् ई) महानसः

II. द्वयोः प्रश्नयोः उत्तरं लिखत : (2×10=20)

ಎರಡು ಪ್ರಶ್ನೆಗಳಿಗೆ ಉತ್ತರಿಸಿ :

Answer **any two** questions :

1) महाभारतस्य विकासमधिकृत्य प्रबन्धं लिखत ।

ಮಹಾಭಾರತದ ವಿಕಾಸವನ್ನು ಕುರಿತು ಪ್ರಬಂಧ ಬರೆಯಿರಿ.

Write an essay on the development of the epic Mahabharatha.

2) यक्षप्रश्नसंग्रहस्य कथां संग्रह्य लिखत ।

ಯಕ್ಷ ಪ್ರಶ್ನೆ ಸಂಗ್ರಹದ ಕಥೆಯನ್ನು ಸಂಗ್ರಹವಾಗಿ ಬರೆಯಿರಿ.

Write in brief the story of yakshaprashna sangraha.

3) युधिष्ठिरस्य विलापं विशदयत ।

ಯುಧಿಷ್ಠಿರನ ವಿಲಾಪವನ್ನು ವಿವರಿಸಿ.

Describe the lamentations of Yudhisthira.

III. त्रयाणां श्लोकानां अनुवादं कृत्वा विवृणुत : (3×4=12)

ಮೂರು ಶ್ಲೋಕಗಳನ್ನು ಅನುವಾದಿಸಿ ವಿವರಿಸಿ :

Translate and explain **any three** slokas :

1) देवाश्चापि यदावोचन् सूतके त्वां धनञ्जय ।
सहस्राक्षादनवरः कुन्ति पुत्रस्तवेति वै ।।

2) नैषां शस्त्रप्रहारोऽस्ति पदं नेहास्ति कस्यचित् ।
भूतं महदिदं मन्ये भ्रातरो येन मे हताः ।।

3) मा तात साहसं कार्षीः मम पूर्वपरिग्रहः ।
प्रश्नानुक्त्वा तु कौन्तेय ततः पिब हरस्व च ।।

4) इष्वस्त्रमेषां देवत्वं यज्ञ एषां सतामिव ।
भयं वै मानुषो भाव: परित्यागोऽसतामिव ।।

5) पुत्र आत्मा मनुष्यस्य भार्या दैवकृत: सखा।
उपजीवनं च पर्जन्य: दानमस्य परायणम् ।।

IV. **द्वयो:** वाक्ययो: ससन्दर्भं विवृणुत : (2×4=8)
ಎರಡು ವಾಕ್ಯಗಳನ್ನು ಸಂದರ್ಭ ಸಹಿತ ವಿವರಿಸಿ:
Explain with reference to context **any two** sentences :

1) अहं बक: शैवल मत्स्यभक्ष्य: ।
2) यथा प्रज्ञं तु ते प्रश्नान् प्रतिवक्ष्यामि ।
3) सत्यमेकपदं स्वर्ग्यं ।
4) स्नानं मनोमलत्याग: ।

V. **संस्कृत** भाषया उत्तरं लिखत :

a) **पञ्चानां** लिङ्ग -विभक्ति - वचनानि लिखत । (5×1=5)

1) भ्रातृन्
2) महाबलौ
3) अहं
4) रुद्राणां
5) तस्मात्
6) गृहे
7) भृत्येषु
8) सखा.

b) **पञ्चानां** लकार-पुरुष - वचनानि लिखत । (5×1=5)

1) हरस्व
2) वक्ष्यामि
3) विन्दते
4) तिष्ठति

5) मरिष्यति

6) उच्यते

7) व्रजेत्

8) गच्छ.

VI. इमं परिच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत । **(5×2=10)**

भारतवर्षे सर्वासु वनस्पतिषु तुलसीपादपः सर्वाधिकम् आदरं प्राप्यते । अस्मिन् पादपे असंख्याकाः गुणाः सन्ति । अस्य काष्ठं, पत्राणि च स्वास्थ्यकारीणि, रोगरोधकानि आयुष्यवर्धकानि च विद्यन्ते । भागवत पुराणे इदमपि कथितं यत् तुलसीपादपानां वने यमदूताः अपि प्रवेष्टुं न शक्यन्ते इति । तुलसी तु भगवतः विष्णोः प्रिया सहचरी । अत एव सा 'विष्णुकान्ता' ' केशवप्रिया' इत्यादि नामभिः प्रसिद्धा । तुलस्याः अपरं प्रमुखं नाम 'वृन्दा' अपि अस्ति । वृन्दावने सर्वत्र वृन्दायः एव पादपाः आसन् अतएव तत्स्थानं वृन्दावनं जातम् । चिकित्साक्षेत्रे तुलस्याः महिमा गरीयसी । प्रभातवेलायां प्रथमं तुलसीपत्रसेवनं हृदयरोगे लाभकारी भवति । जम्बीररसेन सह मुखे लेपनेन वदनस्य कान्तिः वर्धते । अत एव नेदं आहचर्यं यत् ईदृशी गुणसम्पन्ना तुलसी भारतीयैः 'देवी' पदे प्रतिष्ठिता सुपूजिता च ।

**प्रश्ना :**

1) भारतवर्षे सर्वासु वनस्पतिषु का अधिकम् आदरं प्राप्यते ?

2) तुलसीपादपानां वने के प्रवेष्टुं न शक्यन्ते ?

3) तुलसी कस्य प्रिया सहचरी ?

4) तुलस्याः अपरं नाम किं ?

5) भारतीयैः तुलसी कस्मिन् पदे प्रतिष्ठिता सुपूजिता च ?

---